.. shrIgaNeshapa nchachAmarastotram ..

॥ श्रीगणेशपञ्चचामरस्तोत्रम् ॥

Document Information

Text title : gaNeshapa.nchachAmarastotram
File name : gaNeshapanchachAmarastotram.itx
Location : doc_ganesha
Author : umApatisharmadvivedi
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : WebD
Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
Latest update : September 02, 2004
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

sanskritdocuments.org

॥ श्रीगणेशपञ्चचामरस्तोत्रम् ॥

श्रीगणेशाय नमः ।
ललाट-पट्टलुण्ठितामलेन्दु-रोचिरुद्भटे
वृतातिवर्चरस्वरोत्सरत्किरीट-तेजसि ।
फटाफटत्फटत्स्फुरत्फणाभयेन भोगिनां
शिवाङ्कतः शिवाङ्कमाश्रयच्छिशौ रतिर्मम ॥ १॥

अदभ्र-विभ्रम-भ्रमद्-भुजाभुजङ्गफूत्कृती-
र्निजाङ्कमानिनीषतो निशम्य नन्दिनः पितुः ।
त्रसत्सुसङ्कुचन्तमम्बिका-कुचान्तरं यथा
विशन्तमद्य बालचन्द्रभालबालकं भजे ॥ २॥

विनादिनन्दिने सविभ्रमं पराभ्रमन्मुख-
स्वमातृवेणिमागतां स्तनं निरीक्ष्य सम्भ्रमात् ।
भुजङ्ग-शङ्कया परेत्यपित्र्यमङ्कमागतं
ततोऽपि शेषफूत्कृतैः कृतातिचीत्कृतं नमः ॥ ३॥

विजृम्भमाणनन्दि-घोरघोण-घुर्घुरध्वनि-
प्रहास-भासिताशमम्बिका-समृद्धि-वर्धिनम् ।
उदित्वर-प्रसृत्वर-क्षरत्तर-प्रभाभर-
प्रभातभानु-भास्वरं भवस्वसम्भवं भजे ॥ ४॥

अलङ्गृहीत-चामरामरी जनातिवीजन-
प्रवातलोलि-तालकं नवेन्दुभालबालकम् ।
विलोलदुल्ललल्ललाम-शुण्डदण्ड-मण्डितं
सतुण्ड-मुण्डमालि-वक्रतुण्डमीड्यमाश्रये ॥ ५॥

प्रफुल्ल-मौलिमाल्य-मल्लिकामरन्द-लेलिहा
मिलन् निलिन्द-मण्डलीच्छलेन यं स्तवीत्यमम् ।
त्रयीसमस्तवर्णमालिका शरीरिणीव तं
सुतं महेशितुर्मतङ्गजाननं भजाम्यहम् ॥ ६॥

प्रचण्ड-विघ्न-खण्डनैः प्रबोधने सदोद्धुरः
समर्द्धि-सिद्धिसाधनाविधा-विधानबन्धुरः ।
सबन्धुरस्तु मे विभूतये विभूतिपाण्डुरः
पुरस्सरः सुरावलेर्मुखानुकारिसिन्धुरः ॥ ७॥

अराल-शैलबालिका-ऽलकान्तकान्त-चन्द्रमो-
जकान्तिसौध-माधयन् मनोऽनुराधयन् गुरोः ।

सुसाध्य-साधवं धियां धनानि साधयन्नय-
नशेषलेखनायको विनायको मुदेऽस्तु नः ॥ ८॥

रसाङ्गयुङ्ग-नवेन्दु-वत्सरे शुभे गणेशितु-
स्तिथौ गणेशपञ्चचामरं व्यधादुमापतिः ।
पतिः कविव्रजस्य यः पठेत् प्रतिप्रभातकं
स पूर्णकामनो भवेदिभानन-प्रसादभाक् ॥ ९॥

छात्रत्वे वसता काश्यां विहितेयं यतः स्तुतिः ।
ततश्छात्रैरधीतेयं वैदुष्यं वर्द्धयेद्धिया ॥ १०॥

॥ इति श्रीकविपत्युपनामक-उमापतिशर्मद्विवेदि-विरचितं
गणेशपञ्चचामरस्तोत्रं सम्पूर्णम् ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

.. shrIgaNeshapa nchachAmarastotram ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*